# અત્રિ સ્તુતિ

નમામિ ભક્ત વત્સલં । કૃપાલુ શીલ કોમલં ।।
ભજામિ તે પદાંબુજં। અકામિનાં સ્વધામદં ।।
નિકામ શ્યામ સુંદરં । ભવામ્બુનાથ મંદરં ।।
પ્રફુલ્લ કંજ લોચનં । મદાદિ દોષ મોચનં ।।
પ્રલંબ બાહુ વિક્રમં । પ્રભોઽપ્રમેય વૈભવં ।।
નિષંગ ચાપ સાયકં । ધરં ત્રિલોક નાયકં ।।
દિનેશ વંશ મંડનં । મહેશ ચાપ ખંડનં ।।
મુનીંદ્ર સંત રંજનં । સુરારિ વૃંદ ભંજનં ।।
મનોજ વૈરિ વંદિતં । અજાદિ દેવ સેવિતં ।।
વિશુદ્ધ બોધ વિગ્રહં । સમસ્ત દૂષણાપહં ।।
નમામિ ઈંદિરા પતિ । સુખાકરં સતાં ગતિ ।।
ભજે સશક્તિ સાનુજં । શચી પતિ પ્રિયાનુજ ।।
ત્વદંઘ્રિ મૂલ યે નરાઃ । ભજંતિ હીન મત્સરા ।।
પતંતિ નો ભવાર્ણવે । વિતર્ક વીચિ સંકુલે ।।
વિવિક્ત વાસિનઃ સદા । ભજંતિ મુક્તયે મુદા ।।
નિરસ્ય ઈંદ્રિયાદિકં । પ્રયાંતિ તે ગતિં સ્વકં ।।
તમેકમદ્‌ભુતં પ્રભું । નિરીહમીશ્વરં વિભું ।।
જગદ્‌ગુરુ ચ શાશ્વતં । તુરીયમેવ કેવલં ।।
ભજામિ ભાવ વલ્લભં । કુયોગિનાં સુદુર્લભં ।।
સ્વભક્ત કલ્પ પાદપં । સમં સુસેવ્યમન્વહં ।।
અનૂપ રૂપ ભૂપતિં । નતોઽહમુર્વિજા પતિં ।।
પ્રસીદ મે નમામિ તે । પદાબ્જ ભક્તિ દેહિ મે ।।
પઠંતિ યે સ્તવં ઈદં । નરાદરેણ તે પદં ।।
વ્રજંતિ નાત્ર સંશયં । ત્વદીય ભક્તિ સંયુતાઃ ।।
બિનતી કરિ મુનિ નાઈ સિરુ કહ કર જોરિ બહોરિ ।
ચરણ સરોરુહ નાથ જનિ કબહું તજૈ મતિ મોરિ ।।